# JAIN COLLEGE

463/465, 18th Main Road, SS Royal, 80 Feet Road
Rajarajeshwari Nagar, Bangalore - 560 098

***SUBJECT: SANSKRIT***

***II PUC***
***MOCK - I***

***Timings Allowed: 3 Hrs 15 Minutes*** ***Total Marks: 100***

**I. एकवाक्येन उत्तरं लिखत ।** **10 x 1 = 10**

१. भारतीयसाहित्ये कति पुराणानि प्रसिद्धानि?
२. राजा किमाश्रित्य रात्रौ स्थितः ?
३. प्रव्राजकः वणिजः गृहं किमर्थम् अगच्छत्?
४. कण्वशिष्यौ कौ?
५. राणाप्रतापस्य पूर्वजानां अमात्यः कः?
६. महाश्वेता किम् अजिघ्रत्?
७. सुन्दरः किमर्थं नगरं आगच्छति?
८. कर्णस्य रक्तम् कः अपिबत्?
९. अर्थान् कथं चिन्तयेत्?
१०. कृष्णशास्त्रिमहोदयेन आरब्धा पत्रिका का?

**II द्वित्रैः वाक्यैः कन्नडभाषया वा आङ्लभाषया वा उत्तरं लिखत । (पञ्चानामेव)** **5 x 2 = 10**

११ भारतवर्षम् इति किमर्थं कथ्यते ?
१२ विस्मितः राक्षसः विक्रमादित्यं किं पृच्छति?
१३. महाकविकालिदासः ।
१४ बिल्लाः राणाप्रताप कथं साहाय्यम् अकुर्वन्?
१५ पुण्डरीकस्य अनुरागं महाश्वेता कथं जानाति?
१६ "शान्त्याः" सौन्दर्यं वर्णयत ।
१७. नरविग्रहाः देवाः के?

**III पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नड–आङ्लभाषया वा कुरुत । (त्रयणामेव)** **3 x 3 = 9**

१८. भारतस्यास्य वर्षस्य नवभेदान्निबोधत ।
समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम् ॥

१९. ददर्शान्तः कन्यां तां हृदयोन्मादकारिणीम् ।
उपयेमे च गान्धर्वविधिना तां च तत्क्षणम् ॥

२०. महाभागः कामं नरपतिरभिन्नास्थितिरहो
न कश्चित् वर्णानां अपथमपकृष्टोऽपि भजते ।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ।

२१ इदमुपनतमेवं रूपमक्लिष्टकान्तिः
प्रथमपरिगृहीतं स्यान्नवेति व्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नैव शक्नोमि हातुम् ॥

२२ धन्योऽस्मि गमनात्पूर्वमीदृशी सम्पदागता ।

विना तु गुरुशुश्रूषां नान्यद्भाव्यं परं मम ॥

**IV). पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत (चतुर्णामेव) । 4 x 2 = 8**

२३.सुखानि ते भर्तुकुलदेवताः वितरन्तु ।

२४.मम जीवनं सार्थकं भवेत् ।

२५.किमनेन प्रश्नायासेन ?

२६.अहो! गुरुकुलवैभवम् !

२७ धैर्यधना हिं साधवः

२८.अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥

**V). दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्लभाषया वा उत्तरं लिखत (पञ्चानामेव) । 5 x 5 =25**

२९.विक्रमादित्यस्य परोपकारगुणं वर्णयत ।

३०.दुष्यन्तस्य पात्रचित्रणं कुरुत ।

३१.राणाप्रतापेन अनुभूता कष्टपरम्परा ।

३२.कीदृशं मुनिकुमारकं अपश्यम् इति महाश्वेता वर्णयति ।

३३.कर्णशापप्रसङ्गः ।

३४.शास्त्रिणाम् शिष्यवात्सल्यम् ।

३५.“सा शान्तिः”

**VI). मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत । 4 x 1 = 4**

३६.सर्वः सगन्धेषु___________।

३७.भगवतः अशेषत्रिभुवनसुन्दरं____________ आसीत् ।

३८.________ मम दृष्टिपथात् ।

३९ विद्या_____________ रक्ष्यते ।

| रुपम . योगेन. विश्वसिति. अपेहि |
|---|

**VII संयोजयत । 4 x 1 = 4**

| | | |
|---|---|---|
| ४० | गौरी | प्रजापतिः |
| ४१ | श्रुत्वा | कुलपर्वतः |
| ४२ | ब्रह्मा | हंसः |
| ४३ | महेन्द्रः | ज्ञानमवाप्नोति |

**VIII रेखाङ्किततानि पदानि आश्रित्य प्रश्ननिर्माणं कुरूत (त्रयणामेव) 3 x 1 = 3**

४४.शान्तिः <u>धनं</u> न स्वीचकार ।

४५.<u>अम्बया</u> सह स्नातुम् अभ्यागमम्।

४६.मेवाडः <u>राजस्थाने</u> प्रसिद्धम् ।

४७.बाणभट्टः <u>गद्यसाम्राज्य सार्वभौमः</u> इति प्रसिद्धः ।

४८.विमर्शकः <u>कृतीन्</u> परिशीलयति ।

**IX <u>यथानिर्दशं कुरुत (चतुर्णामेव)</u> 4 x 3 = 12**

४९. **सन्धिं विभजत (त्रयाणामेव)**

धर्मासनात्, अभ्युपगमनादेव, परशुराम उवाच, नाम्नैव

५० **समस्तपदं लिखत (त्रयाणामेव)**

भारतस्य इदम्, मात्रा सदृशी, धवला कीर्तिः यस्य सः, हरेः चिन्तनम् ॥

५१ **लिङ्ग–विभक्ति–वचनानि लिखत––––(द्वयोरेव)**

मात्रा, त्वयि, तस्याम्, पत्रेण

५२ **लकार पुरुष––––––(द्वयोरेव)**

भव, अगमन्, निध्यायेत्, वर्धयिष्यति

५३. **वाक्यदोषं परिहरत**

महाराजेन चित्रम् दृष्टवान् ।

५४ **प्रयोगं परिर्वतमत**

हरिणा राक्षसः परिगृहीतः

अथवा

दुष्यन्तः शकुन्तलां अपश्यत्

५५ **अलङ्कारं सलक्षणं निर्दिशत**

विद्या प्रवासे मातृसदृशी

अथवा

मूर्तिरिव धर्मस्य

**५६. कन्नडभाषया वा आङ्लभाषया अनुवदतः ।** **5**

निखिलेऽस्मिन् भारतदेशे को न जानाति अत्रत्यस्य द्वितीयप्रधानमिन्त्रिपदम् अलङ्कुर्वाणस्य श्रीमतः लालबहादूरशास्त्रिणः नाम । अस्य महानुभावस्य जन्म १९०४ तमे वर्षे अक्टोबरमासस्य द्वितीये दिनाङ्के वाराणसी समीपस्थे मोगलसराई नामक स्थाने समभूत् । एतस्य विद्याध्ययनं वाराणस्यं हरिश्चन्द्रविद्यालये काशीविद्यापीठे च सम्पन्नम् । काशीविद्यापीठतः असौ शास्त्री पदवीं प्राप्तवान् । अत एव अयं शास्त्रीति नाम्ना प्रसिद्धः ।

**५७. संस्कृतभाषया अनुवदत–** **5**

ಒಮ್ಮೆ ರಾಜರ್ಷಿಯಾದ ಜನಕಮಹಾರಾಜನ ಬಳಿ ಋಷಿಗಳು ಬಂದು ಪ್ರಶ್ನಿಸಿದರು – 'ಹೇ ರಾಜನ್, ಪ್ರಜಾಪಾಲನೆ ಹಾಗೂ ಯೋಗಸಾಧನೆಗಳನ್ನು ಏಕಕಾಲದಲ್ಲಿ ಹೇಗೆ ಮಾಡುತ್ತೀಯೆ?' ಎಂದು. ಆಗ ಜನಕನು 'ಎಲೈ ಋಷಿವರ್ಯರೇ, ನೀವು ಸ್ವತಃ ತಿಳಿದಿದ್ದರೂ, ನನ್ನನ್ನು ಪರೀಕ್ಷಿಸಲು ಪ್ರಶ್ನಿಸುತ್ತಿರುವಿರಿ ಎಂದು ಭಾವಿಸುತ್ತೇನೆ, ಈ ಪ್ರಪಂಚದಲ್ಲಿ ಎಲ್ಲವೂ ಪರಮೇಶ್ವರನ ಅನುಗ್ರಹದಿಂದ ನಡೆಯುತ್ತದೆ. ನನ್ನದು ಏನೂ ಇಲ್ಲ ಎಂಬ ಭಾವನೆಯಿಂದ ಕರ್ತವ್ಯವನ್ನು ನಿರ್ವಹಿಸುತ್ತೇನೆ. ಹಾಗಾಗಿ ಇದು ಸಾಧ್ಯ' ಎಂದು ಉತ್ತರಿಸಿದನು.

Once the sages went to the king Janaka and asked him-'Oh king, how can you perform both protection of the subjects and accomplishing Yoga, simultaneously?' The king replied-'Oh great sages, I think you are questioning me, though you yourselves know it. Everything happens in this world by the grace of Almighty. I discharge my duties with the feeling that nothing is mine. So this is possible.'

**५८. परिच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत ।** **5 x 1 = 5**

अस्मिन् संसारे सर्वे जीविनः सुखप्राप्तये उद्योगशीलाः दृश्यन्ते । उद्योगिनः मनुष्याः धनं प्राप्य सुखं लभन्ते । उद्योगेन एव धनवन्तः भवन्ति । उद्योगः प्राणिनां नियतो धर्मः । उद्योगेन एव असम्भवानि सम्भवानि, दुःसाध्यानि सुसाध्यानि भवन्ति । उद्योगेन एव सर्वं फलन्ति । यः प्रयत्नशीलोऽस्ति , देवाः तस्येव साहाय्यं कुर्वन्ति । निरुद्योगिनः राष्ट्रस्य धातकाः भवन्ति । श्रीकृष्णः अपि कर्मयोगं बोधयति । कुत्रापि प्रयत्नं विना उद्योगं साफल्यं न भवति । राष्ट्रस्य–सर्वाङ्गीणा समुन्नातिः उद्योगनैव जायते ।

**प्रश्नाः**

१. कीदृशः मनुष्याः सुखं लभन्ते ?

२. उद्योगेन कानि कानि साधनानि भवन्ति?

३. देवाः कस्य साहाय्यं कुर्वन्ति ?

४. श्रीकृष्णास्य उपदेशः कः ?

५. राष्ट्रस्य समुन्नतिः केन जायते ॥

****************